Roll No.
रोल नं

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | | | | |

Code No. **035**

Candidates must write the Code on the title page of the answer-book.

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख पृष्ठ पर अवश्य लिखें।

# SANSKRIT COURSE - (B) संस्कृत कोर्स – (ब)

## आदर्श प्रश्नपत्रम् (वर्ष २०२६-२७)

General Instructions:
सामान्य निर्देश :

Read the following instructions very carefully and strictly follow them:
निम्नलिखित निर्देशों को ध्यान से पढ़ें एवं पूर्णरूप से उनका अनुपालन करें।

Time allowed: 3 hours
निर्धारितः समय : होरात्रयम्

Maximum marks: 80
अधिकतमाङ्काः 80

Note/नोट :

(i) Please check that this question paper contains 14 printed pages.
कृपया जाँच कर लें कि इस प्रश्न-पत्र में 14 मुद्रित पृष्ठ हैं।

(ii) Please check that this question paper contains 18 questions.
कृपया जाँच कर लें कि इस प्रश्न-पत्र में 18 प्रश्न हैं।

(iii) This question paper comprises four sections - Section - A, Section - B, Section - C and Section - D. All question are compulsory.
यह प्रश्नपत्र चार खण्डों में विभाजित किया गया है **खण्ड क, खण्ड ख, खण्ड- ग,** एवं **खण्ड -घ**, सभी प्रश्न अनिवार्य हैं।

(iv) In Section 'A': there is only one question which carries 10 marks.
खण्ड 'क' में केवल एक प्रश्न है, जिसके लिए 10 अंक निर्धारित हैं।

(v) In Section - 'B': total questions are three i.e., Q. no. 2 to Q.no. 4, carrying 5 marks each.
खण्ड 'ख' में प्रश्न संख्या 2 से प्रश्न संख्या 4 तक तीन प्रश्न हैं। प्रत्येक प्रश्न के लिए 5 अंक निर्धारित हैं।

(vi) In Section - 'C': total questions are seven i.e., Q. no. 5 to Q.no. 11.
Q. No. 5 to Q. No. 7 carry 4 marks each;
Q. No. 8 carry 3 marks,
Q. No. 9 carry 4 marks;
Q. No. 10 and Q. No. 11 carry 3 marks each.
खण्ड - 'ग' में प्रश्न संख्या 5 से प्रश्न संख्या 11 तक सात प्रश्न हैं।

प्रश्न संख्या 5 से प्रश्न संख्या 7 तक प्रत्येक प्रश्न के लिए 4 अंक;
प्रश्न संख्या 8 के लिए 3 अंक;
प्रश्न संख्या 9 के लिए 4 अंक;
प्रश्न संख्या 10 एवं प्रश्न संख्या 11 में प्रत्येक के लिए 3 अंक निर्धारित हैं।

(vii) In Section - 'D', total questions are seven i.e., Q. no. 12 to Q.no. 18.
Q. No. 12 to Q. No. 14 carry 5 marks each;
Q. No. 15 to Q. No. 17 carry 4 marks each;
Q. No. 18 carry 3 marks;
खण्ड - 'घ' में प्रश्न संख्या 12 से प्रश्न संख्या 18 तक सात प्रश्न हैं।
प्रश्न संख्या 12 से प्रश्न संख्या 14 तक में प्रत्येक के लिए 5 अंक हैं।
प्रश्न संख्या 15 से प्रश्न संख्या 17 तक में प्रत्येक के लिए 4 अंक हैं।
प्रश्न संख्या 18 के लिए 3 अंक निर्धारित हैं।

(viii) There is no overall choice (except Q. No. 3) in the question paper. However, an internal choice has been provided in Q. No. 1, Q. No. 4 to Q. No. 15 and Q. No. 18. You have to attempt only one of the choice in such questions.
प्रश्न-पत्र में समग्र पर (प्रश्न संख्या 3 को छोड़कर) कोई विकल्प नहीं है। तथापि प्रश्न संख्या 1, प्रश्न संख्या 4 से प्रश्न संख्या 15 व प्रश्न संख्या 18 में आन्तरिक विकल्प दिए हुए हैं। ऐसे प्रश्नों में केवल एक ही विकल्प का उत्तर लिखिए।

(ix) In addition to this, separate instructions are given with each section and question, wherever necessary.
इसके अतिरिक्त, आवश्यकतानुसार, प्रत्येक खण्ड और प्रश्न के साथ भी यथोचित निर्देश दिए गए हैं।

## खण्डः- 'क' Section- 'A' १० अङ्काः

### अपठित – अवबोधनम्

१. अधोलिखितं गद्यांशं पठित्वा यथानिर्देशम् उत्तरत-

एकदा एकः कर्तव्यपरायणः नगररक्षकः इतस्ततः भ्रमन् एकम् अशीतिवर्षीयं महापुरुषम् अपश्यत् । सः आम्रवृक्षस्य आरोपणे तल्लीनः आसीत् । इदं दृष्ट्वा नगररक्षकः तं महापुरुषम् अवदत् - अवलोकनेन प्रतीयते यत् यदा एषः वृक्षः फलिष्यति तदा भवान् जीवितः न भविष्यति । अतः किमर्थं वृथा परिश्रम कुर्वन्ति भवन्तः ? महापुरुषः हसित्वा अवदत् - पश्यन्तु एतान् फलयुक्तान् वृक्षान् । एतेषाम् आरोपणं मया न कृतं परं फलानि अहं खादित्वा सन्तुष्टः भवामि । अतः यदा मम आरोपितस्य वृक्षस्य फलानि अन्ये खादिष्यन्ति, अहं पुनः प्रसन्नः भविष्यामि । महापुरुषस्य वचनं श्रुत्वा तं नमस्कृत्य सः नगररक्षकः उक्तवान् - अनुकरणीया एवं सज्जनानां सज्जनता ।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयमेव) 2x1=2

(i) नगररक्षकः कीदृशं महापुरुषम् अपश्यत् ?

(ii) सज्जनानां सज्जनता कीदृशी भवति ?

(iii) कः हसित्वा अवदत् ?

(आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयमेव) 2x2=4

(i) सः कस्य आरोपणे तल्लीनः आसीत् ?

(ii) महापुरुषेण आरोपितस्य वृक्षस्य फलानि के खादिष्यन्ति ?

(iii) महापुरुषस्य वचन श्रुत्वा सः नगररक्षकः किम् उक्तवान् ?

(इ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत । 1x1=1

(ई) भाषिककार्यं यथानिर्देशम् उत्तरत – (केवलं प्रश्नत्रयम्) 3x1=3

(i) 'नगररक्षकः' इति पदस्य विशेषणपदं चिनुत-

(A) कर्तव्यपरायणः (B) जीवितः

(C) महापुरुषः (D) इतस्ततः

(ii) 'दुर्जनानाम्' इति पदस्य विलोमपदं चिनुत-

(A) वृक्षान् (B) सज्जनानां

(C) अरोपणं (D) महापुरुषम्

(iii) अस्मिन् गद्यांशे 'भविष्यामि' इति क्रियापदस्य कर्तृपदं चिनुत -

(A) सः  (B) मया

(C) अहं  (D) नगररक्षकः

(iv) अनुच्छेदे 'दर्शनेन' इति पदस्य कः पर्यायपदं चिनुत-

(A) आरोपणे  (B) फलानि

(C) अवलोकनेन  (D) नमस्कृत्य

## खण्डः 'ख' 15 अङ्काः

## रचनात्मकं कार्यम्

२. भवान् मयंकः प्रयागे पठति। स्व- अध्ययनस्य प्रगतिविषये ज्येष्ठ-अग्रजं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखतु। 10x½=5

परीक्षाभवनम्

(i) ______________

दिनाङ्कः ______________

पूज्य भ्रात !

(ii)______________। अत्र सर्वं कुशलम्। तत्रापि कुशलम्। (iii)___________ अधुना (iv) ___________ शिक्षणं नियमेन आरब्धम्। अहं प्रतिदिनं प्रातः (v) ____________उत्तिष्ठामि। ततः (vi)___________ पठितानां पाठानाम् आवृत्तिं करोमि। संस्कृतविषये मया प्रथमं स्थानं (vii)___________। गणितविषये मम दुर्बलता अधुना (viii)___________। पितृभ्यां मम (ix)___________।

भवताम् अनुजः

(x)______________

| मञ्जूषा |
|---|
| सादरं नमः, पञ्चवादने, प्रणामाः, प्रयागतः, मम, कामये, दूरीभूता, सप्तवादन-पर्यन्तम्, मयंकः, प्राप्तम्। |

३. प्रदत्तचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत। 5×1=5



**मञ्जूषा**

गुरुकुलम्, शिष्याः, कुटीरम्, खगाः, सरणिः, उपविशति, पाठयति, पठन्ति, वृक्षाः, पर्वतः।

**अथवा**

निम्नलिखितं विषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया स्वतन्त्ररूपेण वा संस्कृतेन पञ्चवाक्यात्मकम् एकम् अनुच्छेदं लिखत - 5x1=5

**'दीपावलिः'**

**मञ्जूषा**

दीपानां पंक्तिः, जनाः, रात्रौ, पूजयन्ति, मिष्टान्नम्, वितरन्ति, स्फोटयन्ति, प्रतीकम्, उल्लासमयम्, बालकाः, अमावस्यायाम्, कार्तिकमासस्य, लक्ष्मीम्।

४. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत - (केवलं वाक्यपञ्चकम्) 5x1=5

| | | |
|---|---|---|
| (क) | मोहन घर जाता है। | Mohan goes home. |
| (ख) | नदी के दोनों ओर पेड़ हैं। | There are trees on both sides of the river. |
| (ग) | तुम सब घर गए। | You all went home. |
| (घ) | उन दोनों बालिकाओं ने नृत्य किया। | Both of them danced. |
| (ङ) | बालक भोजन करेंगे। | The boys will eat food. |
| (च) | तुम सब कार्य करोगे। | You all will do the work. |

**खण्डः 'ग'** **25 अङ्काः**

## अनुप्रयुक्त-व्याकरणम्

५. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत – (केवलं प्रश्नचतुष्टयम्) 4x1=4

(i) जातं प्रकृतिरेव शरणम्।

(ii) आपेदिरेऽम्बरपथं परितः पतङ्गाः।

(iii) क्रोधो हि शत्रुः प्रथमो नराणाम्।

(iv) कथं जनः + तम् परितोषयिष्यति ?

(v) "एतत् भवान् पश्यति न?" इति प्रति + अवोचत्।

६. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्) 4x1=4

(i) रामः कुशलवौ आसनार्धम् उपवेशयति।

(A) कुशः च लवौ च (B) कुशः च लवः च

(C) कुशौ च लवौ च (D) कुशौ च लवः च

(ii) वृक्षस्य उपरि वानरः आरोहति।

(A) वृक्षे उपरि (B) वृक्षस्योपरि

(C) वृक्षोपरि (D) वृक्षौपरि

(iii) अहमेव स्थितप्रज्ञः इव स्थित्वा सर्वेषां रक्षायाः उपायान् चिन्तयिष्यामि।

(A) स्थिता प्रज्ञा यस्य सः

(B) स्थिता प्रज्ञा यस्याः सा

(C) स्थितः प्रज्ञः यस्याः सा

(D) स्थिताः प्रज्ञाः यस्मै तत्

(iv) समयम् अनतिक्रम्य सर्वेषां महत्त्वं विद्यते।

(A) उपसमयम्

(B) अनुसमयम्

(C) प्रतिसमयम्

(D) यथासमयम्

(v) अभियुक्तः च अतीव कृशकायः आसीत्।

(A) कृशः च कायः च

(B) कृशं च कायं च

(C) कृशः कायः यस्य सः

(D) कायं च कृशं च

७. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्टयम्) 4x1 = 4

(i) किं कुपिता एवं भणति ?

(A) कुप् + ता

(B) कुपित + ता

(C) कुपित + टाप्

(D) कुपित + तल्

(ii) वेदानां महत् + त्व को न जानाति ?

(A) महत्त्वम्

(B) महत्त्वा

(C) महत्ता

(D) महानता

(iii) सर्वजन्तून दृष्ट्वा पृच्छति।

(A) दृश् + क्त

(B) दृश् + क्तवतु

(C) दर्श + क्त्वा

(D) दृश् + क्त्वा

(iv) तपोवनवासिनो देवी इति नाम्ना आह्वयन्ति।

(A) देव + ङीप्
(B) देवी + ङीप्
(C) देव + ई
(D) देव + टाप्

(v) पुत्रद्वयोपेता बुद्धि + मतुप् पितुर्गृहं प्रति चलिता।

(A) बुद्धिमान्
(B) बुद्धिमन्तः
(C) बुद्धिमत्यः
(D) बुद्धिमती

८. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत- (केवलं प्रश्नत्रयम्) 3x1=3

(i) सरिता – श्वेते ! त्वं कुत्र गच्छसि ?

श्वेता – सरिते ! मया तु हट्टम्____________।

(A) गच्छयते
(B) गम्यते
(C) गच्छामि
(D) गम्यन्ते

(ii) सरिता -__________हट्टं किमर्थं गम्यते ?

श्वेता - अहं उत्सवं दृष्टुं गच्छामि।

(A) त्वम्
(B) त्वया
(C) अहम्
(D) मया

(iii) सरिता – किं तत्र तव जननी अपि गच्छति ?

श्वेता – नहि, तत्र _____________एव गम्यते।

(A) वयं
(B) मया
(C) अहं
(D) सखी

(iv) सरिता - शोभनम्, किं तत्र जनाः अपि उत्सवं पश्यन्ति ?

श्वेता – आम्। तत्र जनैः अपि __________ दृश्यते।

(A) उत्सवेन (B) उत्सवम्

(C) उत्सवान् (D) उत्सवः

९. कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत- (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) अहम् (07:30)____________ वादने विद्यालयम् गच्छामि।

(ii) प्रातः (10:00)____________ वादने प्रधानाचार्येण वार्षिकविवरणस्य प्रस्तुतीकरणम्।

(iii) प्रातः (10:45)____________ वादने मुख्यातिथिना पुरस्कारवितरणम्।

(iv) अहम् (03:15)____________ वादने गृहम् आगच्छामि।

(v) अहं सायं (06:00)____________ वादने ईशवन्दनां करोमि।

१०. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत- (केवलं प्रश्नत्रयम्) 3x1=3

(i) विद्यालये__________ वनमहोत्सवः मान्यते।

(ii) कच्छपः __________चलति।

(iii) अस्माकं जीवनं जलं__________ असम्भवम्।

(iv) अहं __________ ग्रामम् अगच्छम्।

| **मञ्जूषा** |
|---|
| शनैः-शनैः, ह्यः, विना, अद्य। |

११. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत- (केवलं प्रश्नत्रयम्) 3x1=3

(i) त्वम् पाठं <u>पठति</u>।

(A) अपठत् (B) पठसि

(C) पठन्ति (D) पठामि

(ii) उपवनः सुन्दरम् अस्ति।

(A) उपवनस्य (B) उपवनौ

(C) उपवनं (D) उपवने

(iii) शरीरेण बलीवर्दः दुर्बलम् अस्ति।

(A) दुर्बला (B) दुर्बलस्य

(C) दुर्बलः (D) दुर्बलेन

(iv) एका सिंहः सुखेन विश्राम्यते।

(A) एकम् (B) एकः

(C) एकेन (D) एकाः

## खण्डः 'घ'

## पठितावबोधनम् 30 अङ्काः

१२. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्। न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक्-पृथक् विवरणं श्रुतवान्। सर्वं वृत्तमवगत्य सः तं निर्दोषम् अमन्यत, आरक्षिणं च दोषभाजनम्। किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत्। ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्। अन्येद्युः तौ न्यायालये स्व-स्व पक्षं पुनः स्थापितवन्तौ। तदैव कश्चिद् तत्रत्यः कर्मचारी समागत्य न्यवेदयत् यत् इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः। तस्य मृतशरीरं राजमार्गं निकषा वर्तते। आदिश्यतां किं करणीयमिति। न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान्।

(i) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2x½=1

(क) न्यायाधीशस्य नाम किमासीत्?

(ख) शवं न्यायालये आनेतुं कः आदिष्टवान्?

(ग) अग्रिमे दिने कः चौर्याभियोगे तं न्यायालयं नीतवान्?

(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2×1=2

(क) कर्मचारी समागत्य किं न्यवेदयत् ?

(ख) न्यायाधीशः कं किं च आदिष्टवान् ?

(ग) स्व-स्व पक्षं न्यायालये कौ स्थापितवन्तौ ?

(iii) यथानिर्देशम् उत्तरत – (केवलं प्रश्नद्वयम्) 2×1=2

(क) 'शरीरम्' इति पदस्य विशेषणपदं गद्यांशात् लिखत।

(ख) "न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुम् आदिष्टवान्।" अत्र क्रियापदं किम् ?

(ग) "निर्दोषम्" इत्यस्य विलोमपदं गद्यांशात् लिखत।

१३. अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत - 5

गुणी गुणं वेत्ति न वेत्ति निर्गुणो, बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः, करी च सिंहस्य बलं न मूषकः॥

(i) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2x½=1

(क) कः बलं वेत्ति ?

(ख) वायसः कस्य गुणं न वेत्ति ?

(ग) सिंहस्य बलं कः जानाति ?

(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2×1=2

(क) वसन्तस्य गुणं कः जानाति ?

(ख) करी कस्य बलं वेत्ति ?

(ग) कीदृशः जनः गुणं जानाति ?

(iii) यथानिर्देशम् उत्तरत – (केवलं प्रश्नद्वयम्) 2×1=2

(क) निर्बलः' इत्यस्य विलोमपदं किं प्रयुक्तम् ?

(ख) 'गजः' अस्य कः पर्यायः अत्र प्रयुक्तः ?

(ग) श्लोके 'कोकिलः' इत्यस्य कृते कः शब्दः प्रयुक्तः ?

१४. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – 5

(गजः तं वृक्षमेव स्वशुण्डेन आलोडयितुमिच्छाति परं वानरस्तु कूर्दित्वा अन्यं वृक्षमारोहति। एवं गजं वृक्षात् वृक्षं प्रति धावन्तं दृष्ट्वा सिंहः अपि हसति वदति च।)

सिंहः - भोः गज ! मामप्येवमेवातुदन् एते वानराः।

वानरः - एतस्मादेव तु कथयामि यदहमेव योग्यः वनराजपदाय वानरः येन विशालकायं पराक्रमिणं, भयङ्करं चापि सिंहं गजं वा पराजेतुं समर्था अस्माकं जातिः। अतः वन्यजन्तूनां रक्षायै वयमेव क्षमाः।

(एतत्सर्वं श्रुत्वा नदीमध्यस्थितः एकः बकः)

बकः - अरे! अरे! मां विहाय कथमन्यः कोऽपि राजा भवितुमर्हति। अहं तु शीतले जले बहुकालपर्यन्तम् अविचलः ध्यानमग्नः स्थितप्रज्ञ इव स्थित्वा सर्वेषां रक्षायाः उपायान् चिन्तयिष्यामि, योजनां निर्मीय च स्वसभायां विविधपदमलंकुर्वाणैः जन्तुभिश्च मिलित्वा रक्षोपायान् क्रियान्वितान् कारायिष्यामि। अतः अहमेव वनराजपदप्राप्तये योग्यः।

मयूरः - (वृक्षोपरितः – साट्टहासपूर्वकम्।) विरम विरम आत्मश्लाघायाः।

(i) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2x½=1

(क) गजः वृक्षं केन आलोडयितुमिच्छति ?

(ख) वानरः किं कृत्वा वृक्षमारोहति ?

(ग) कः शीतले जले तिष्ठति ?

(ii) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2×1=2

(क) बकः कुत्र स्थित्वा सर्वेषां रक्षायाः उपायान् चिन्तयिष्यति ?

(ख) सिंहः कथं हसति वदति च ?

(ग) सर्वे पशु-पक्षिणः परस्परं किमर्थं कलहं कुर्वन्ति ?

(iii) यथानिर्देशम् उत्तरत – (केवलं प्रश्नद्वयम्) 2×1=2

(क) 'सिंहः अपि हसति' इत्यत्र क्रियापदं किम् ?

(ख) जन्तुभिः इत्यस्य विशेषणपदं किम् ?

(ग) 'चिन्तयामि' इति क्रियापदस्य कर्तृपदं किम् ?

१५. अधोलिखितानि रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) व्याघ्रस्य <u>भयात्</u> सा विमुक्ता ।

(ii) <u>निर्मलम्</u> जलं नास्ति ।

(iii) बुद्धिमती आत्मपुत्रौ <u>चपेटया</u> प्रहरन्ती जगाद ।

(iv) <u>महानगरेषु</u> वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति ।

(v) <u>चौरस्य</u> पादध्वनिना अतिथिः प्रबुद्धः ।

१६. मञ्जूषायाम् प्रदत्तशब्दानां सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयित्वा पुनः लिखत- 4×1=4

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।

पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥

अन्वयः- पिता (i) __________ बाल्ये महत् (ii) __________ यच्छति, अस्य (iii) __________ किं तपः तेपे इति (iv) __________ तत्कृतज्ञता ।

**मञ्जूषा**

पिता, उक्तिः, विद्याधनम्, पुत्राय

१७. अधोलिखितश्लोकस्य भावार्थे रिक्तस्थानानि मञ्जूषाप्रदत्तशब्दानां सहायतया पूरयित्वा पुनः लिखत - 4×1=4

य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च ।

न कुर्यादहितं कर्म स परेभ्यः कदापि च ॥

भावार्थः – अस्य भावोऽस्ति यत् यः मानवः (i) __________ कल्याणम् अधिकं च सुखम् (ii) __________ सः कदापि अन्येषां जनानां कृते अकल्याणकरं (iii) __________ न कुर्यात् अपितु सर्वदा (iv) __________ कर्म कुर्यात् ।

| मञ्जूषा |
|---|
| इच्छति, कर्म, कल्याणकरम्, स्वकीयम् |

१८. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत - (केवलं प्रश्नत्रयम्) 3x1=3

(i) समान-शील - व्यसनेषु <u>सख्यम्</u> ।

(A) धनम् (B) दैवम्

(C) मैत्री (D) वैरम्

(ii) दुर्दान्तैः <u>दशनैः</u> जनग्रसनं नैव स्यात् ।

(A) वनैः (B) प्रस्तरैः

(C) हस्तैः (D) दन्तैः

(iii) कश्चन निर्धनः <u>वित्तम्</u> उपार्जितवान् ।

(A) फलम् (B) अन्नम्

(C) धनम् (D) अनिलम्

(iv) गावश्च गोभिः <u>तुरगाः</u> तुरङ्गैः ।

(A) खराः (B) गजाः

(C) सिंहाः (D) अश्वाः